Thanjavur Sarasvati Mahal Series - No. 291.

Paratatva Nirnaya and Astasloki

(WITH COMMENTARY)

SARASVATI MAHAL LIBRARY,
THANJAVUR.

1989] ** [Price: Rs. 5-00

Thanjavur Sarasvati Mahal Series - No. 291.

Paratatva Nirnaya and Astasloki

(WITH COMMENTARY)

Edited by

Sri N. K. RAMANUJATATACHARI - Siromani

(Ex. Sanskrit Pandit, Sarasvati Mahal Library)

Published by

SARASVATI MAHAL LIBRARY,

THANJAVUR.

1989] ** [Price : Rs. 5-00

First Edition : — Oct., 1989.

Published with the financial assistance from the Department of Culture, Ministry of Education Government of India.

Published by

Thanjavur Maharaja Serfoji's
Sarasvati Mahal Library Society, Thanjavur.

Printed at

T. M. S. S. M. Library Society Press.
Thanjavur.

நூன்முகம்

இந்து சமயக் கருத்துக்களுக்கு அடிப்படை வேதங்களும், உபநிடதங்களும். வேதங்கள் உரிய கர்மாக்களைச் செய்யுமாறு கட்டளையிடுகின்றன. அத்தகைய கர்மாக்களைச் செய்யும்போது 'சித்தம்' தூய்மையடைகிறது. தூய்மையடைந்த சித்தத்தில் பரபிர்மத்தை சிந்திக்க ஞானம் (அறிவு) கைகூடும். 'ஞானம் அடைவதே பேரானந்தப் பெருவாழ்வு' என நமது முன்னோர்கள் கூறுவர்.

'பிர்மம்' என்பது என்ன? அது எத்தகையது? ஸ்ரீருத்ரனா? சிவனா? ஸ்ரீமந் நாராயணனா? அல்லது இத்தத்துவங்களுக்கெல் லாம் அப்பாற்பட்டதொரு 'வஸ்து'வா? என்பது போன்ற ஆராய்ச்சி களை வேத—உபநிடத—பிர்ம்மசூத்திரம் போன்றவற்றின் கருத்துக் களைக் கொண்டே 'சித்தாந்தம்' செய்வது, உத்தரமீமாம்ஸையாகிய வேதாந்தமாகும். இவைகளே அத்வைத வேதாந்தம்—விசிஷ்டாத் வைத வேதாந்தம்—துவைத வேதாந்தம்—சிவாத்வைத வேதாந்தம் போன்ற மதங்களின் அடிப்படைத்தன்மை. இத்தகைய சித்தாந்தக் கருத்துள்ள நூல்கள் பலப்பல. அத்தகைய நூல்களில் நாராயணனே பிர்ம்ம (பரதத்துவ) மாகக்கொண்ட கொள்கையில் எழுந்த நூலே 'பரதத்துவ நிர்ணயம்' என்னும் இந்த நூல்.

இந்த நூலுடன், அஷ்ட ஸ்லோகி என்னும் நூலும் உரை யுடன் வெளிவருகிறது. இந்த நூலை இயற்றியவர் ஸ்ரீ பராசர பட்டர். இந்நூல் 'ரகசியத் திரயார்த்தம்' என்னும் நூலின் சாரம். இந்த நூல் எட்டு சுலோகங்களில் இயற்றப் பெற்றதால் அஷ்ட சுலோகி என்ற பெயர் கொடுக்கப்பெற்றுள்ளது. இந்த நூலுக்கு உரை எழுதியவர் திரு. ஸ்ரீநிவாஸாச்சாரியார் அவர்கள்,

ஆக, தற்போது இரண்டு நூல்கள் உங்கள் கைகளில் தவழு கின்றன. இவை இந்நூலகப் பருவ இதழ் (எண்கள் 22, 23) களில் வெளிவந்துள்ளன. இவ்விதழ்களின் off-prints தற்போது நூலாக வெளிவந்துள்ளன.

இந்த இரண்டு நூல்களையும் பதிப்பிக்க ஏற்றவண்ணம் தயாரித்து அளித்துள்ளார் திரு. N. K. ராமானுஜ தாதாசாரியார் அவர்கள். இவர் இந்நூலகத்தின் முன்னாள் வடமொழிப் பண்டித ராவார், அன்னாருக்கு இந்நூலகத்தின் சார்பில் நன்றியைத் தெரிவித்துக்கொள்கிறேன். வழக்கம்போல் இந்த நூலையும் வாசகர்கள் வாங்கிப் படித்துப் பயன் பெறக் கோருகிறேன்.

தஞ்சாவூர்.

7—12—89

ஸ்ரீநிவாசன்,
வடமொழிப் பண்டிதர்,
சரசுவதி மகால் நூலகம்.

॥ श्रीः ॥

॥ *परतत्त्वनिर्णयः ॥

। वत्सकुलतिलकेन वरदाचार्यमिश्रेण कृतः ।

श्रीमद्रामानुजमुनिवरै र्यामुनाद्यैर्मुनीन्द्रै-
रन्याचार्यैर्बहुभिरपरै र्विस्तरेणाभ्यधायि ।
विष्णुस्तत्त्वं परमिति परन्यायमन्वादिवाक्यै-
र्व्यक्तार्थाभिः श्रुतिविततिभि स्तद्वयं संक्षिपामः ॥

अत्रेदं साध्यते "नारायणः परं ब्रह्मे"ति । तत्र पूर्वपक्षी मन्यते — रुद्र एव सर्वस्मात्पर इति । तथाहि 'यतो वा इमानी'त्यादिना जगत्कारणमेव परं तत्त्वमित्यवगम्यते । तच्च कारणं किमित्यपेक्षायां, छान्दोग्ये 'सदेव सोम्येदमग्र आसीदि'त्यनेन जगत्कारणं सच्छब्दवाच्यमिति प्रतीयते । वाजसनेयके च 'ब्रह्म वा इदमेकमेवाग्र आसीत्' इति ब्रह्मशब्देन कारणं प्रतिपाद्यते । तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानां सर्वेषामेकविषयत्वात्, सच्छब्दस्य च बृहदबृहत्साधारणतया सामान्यशब्दत्वात्, ब्रह्मशब्दस्य बृहदर्थतया विशेषशब्दत्वात् सामान्यशब्दस्य च सति विशेषोपस्थापके 'छागो वा मन्त्रवर्णात्' इति (पू. मी. ६, ८, ३१) न्यायेन विशेषे पर्यवसानस्य युक्तत्वाच्च सच्छब्दवाच्यमेव कारणं ब्रह्मशब्देन विशेष्यत इति निश्चीयते । तथा चैतरेयके 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यनेन चेतनाचेतनसाधारणब्रह्मशब्दनिर्दिष्टं वस्तु स्वनअन्नैकान्तेन आत्मशब्देन विशेष्यते । आत्मशब्दस्य सर्वचेतनसाधारणत्वात् विशेषाकांक्षायां श्वेताश्वतरोपनिषदि 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः । तदक्षरन्तत्सवितुर्वरेण्यं[1] प्रज्ञा च तस्मात्प्रसृता पुराणी' इत्यनेन स विशेषश्शिव एवेत्यवगम्यते ॥

ननु महोपनिषदि 'एको ह वै नारायण आसीत्' इत्येतद्वाक्योपस्थापितो नारायण एव स विशेषोऽस्तु । मैवम्, अस्य वाक्यस्य अनुवादत्वेन स्वयं विशेषोपस्थापनासामर्थ्यात् । अनुवादत्वञ्च 'ह्वा' इति प्रसिद्ध्यर्थनिर्देशादवगम्यते । यथा छान्दोग्ये 'सर्वाणि ह्वा इमानि

*सरस्वतीमहाल् Mss. Nos. B. 9832-a & b. B. 9810 B. 9809.

1, वरेणियम् — क. पाठः ।

भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' 'सर्वाणि ह्वा इमानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते' इत्यनयोर्वाक्ययोः 'ह्वा' इति प्रसिद्धवन्निर्देशादनुवादत्वम् । ततश्च नारायणशब्दोऽपि आकाशप्राणशब्दवत् अनुवादलिङ्गरहितैवकाराद्युपादेयत्वलिङ्गयुक्तवाक्यान्तरोपस्थापितशिवपर एव भवितुमर्हति । अतो रुद्र एव जगत्कारणमिति निर्णीयते । अतो[1] मोक्षप्रदत्वमपि तस्यार्थसिद्धम् । यतो वा इमानीत्यादिषु जगत्कारणस्यैव मोक्षप्रदत्वप्रतिपादनात् ॥

किञ्च रुद्रस्य नारायणात्परत्वं मोक्षप्रदत्वं च श्वेताश्वतरोपनिषद्येव साक्षात् श्रूयते । 'वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति । नान्यः पन्था विद्यतेऽयनाय ॥ यस्मात्परं नापरमस्ति किञ्चि द्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येक स्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ ततो यदुत्तरतरं तदरूपमनामयम् । य एतद्विदुरमृतास्ते भवन्ति, अथेतरे दुःखमेवापि यन्ति ॥ सर्वाननशिरोग्रीव स्सर्वभूतगुहाशयः । सर्वव्यापी च भगवान् तस्मात्सर्वगतश्शिवः' इति । अत्र हि 'तेनेदं पूर्णं पुरुषेण सर्वमित्यन्तेन पुरुषसूक्तोदित परमपुरुषं प्रतिपाद्य, ततो यदुत्तरतरमिति तस्मात्परतरं किञ्चिद्वस्तु निर्दिश्य 'य एतद्विदुरमृतास्ते भवन्ति' इति तस्यैव मोक्षप्रदत्वं नान्यस्येत्यभिधाय, तस्मात्सर्वगतश्शिवः इति[2] विशेषोपस्थापनं क्रियते ॥

तथा छान्दोग्ये दहरविद्यायां 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाश स्तस्मिन् यदन्त स्तदन्वेष्टव्यम् तद्वाव विजिज्ञासितव्यम्' इत्यनेन हृदयपुण्डरीकमध्यवर्तित्वेन आकाशशब्दवाच्यं किञ्चिद्वस्तु निर्दिश्य तदन्तर्वर्तिनः कस्यचित्तत्त्वस्य मुमुक्षुभिरन्वेष्टव्यत्वं प्रतिपाद्यते । अत्र आकाशशब्दनिर्दिष्टस्य एतत्प्रकरणोपसंहारे 'आकाशो ह वै नामरूपयो र्निर्वहिता ते यदन्तरा तद्ब्रह्मे'ति नामरूपनिर्वोढत्वश्रवणात्; पुरुषसूक्ते 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति परमपुरुषस्य नामरूपकर्तृत्वदर्शनाच्च आकाशशब्दाभिहितः परमपुरुष इत्यवगम्यते । अतोऽस्मिन् वाक्ये परमपुरुषादन्य स्तदन्तर्वर्ति किञ्चिद्वस्तु मुमुक्षुभिरुपास्यतयोक्तमिति प्रतीयते । तैत्तिरीयदहरविद्यायाञ्च 'दहरं विपाप्मं वरवेश्मभूतं यत्पुण्डरीकं पुरमध्यसꣳस्थम् । तत्राऽपि दहरं गगनं विशोक स्तस्मिन् यदन्त स्तदुपासितव्यम् ॥

1. अत एव मोक्षप्रदत्वमपि तस्यैवार्थसिद्धम् — क. पाठः ।

2. इत्यन्तेन विशेषोपादानं क्रियत इति प्रतीयते — क पाठः ।

यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः' इति छान्दोग्यवाक्यवत् हृदयान्तर्वर्तितया उपास्यब्रह्माधारतया च आकाशपर्यायगगनशब्देन परमपुरुषं निर्दिश्य तदाध्येयं किञ्चिदुपास्यमभिधाय तद्विशेषजिज्ञासायां यः परः स महेश्वर इति विशेषनिर्णयश्च क्रियते ॥

तथा बृहदारण्यके च 'य एषोऽन्तर्हृदय आकाशः तस्मिञ्छेते सर्वस्य वशी सर्वस्येशान' इति हृदयमध्यस्थाकाशशब्देन छान्दोग्यवत् परमपुरुषमभिधाय, तदन्तर्वर्तितया ईशानः प्रतिपाद्यते। तथा अथर्वशिखा च 'कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः [1] सर्वेश्वरश्शम्भुराकाशमध्ये ध्येय' इति हृदयमध्यस्थाकाशवर्तितयोपास्यं शम्भुं विशिष्य "शिव एको ध्येयः शिवकरः सर्वमन्यत्परित्यज्ये"ति तमेव शिवशब्देन निगमयति ॥

तथा तैत्तिरीयकेऽपि 'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्' इति गुहाशब्दनिर्दिष्टहृदयान्तर्वर्तितया उपास्यब्रह्माधारतया च प्रसिद्धाकाशव्यावर्तक परमशब्दविशेषित व्योमशब्दाभिहित पुरुषोत्तमाधेयतया उपास्यं ब्रह्मशब्दनिर्दिष्टं वस्तु पूर्वोदाहृतबहुश्रुत्यन्तरैकार्थ्यात् शिव एवेति विज्ञायते। तदेव नारायणात्परं तदन्तर्वर्तितया च उपास्यशिवएवेति प्रतिपाद्यते इति निश्चीयते ॥

तथा अथर्वशिरसि प्रथमे खण्डे 'देवा ह वै स्वर्गं लोकमगमन। ते देवा रुद्रमपृच्छन्। को भवानिति। सोऽब्रवीत्। अहमेकः प्रथममासम् वर्त्तामि च भविष्यामि च। नान्यः कश्चिन्मत्तोव्यतिरिक्तः' इत्यादिना देवैः पृष्टो रुद्रः स्वसर्वैश्वर्यं प्रपञ्चयति। तथा द्वितीये खण्डे च 'ततो देवा ऊर्ध्वबाहवो रुद्रमन्वस्तुवन्निति' प्रक्रम्य 'यो वै रुद्र स्स भगवान् यश्च ब्रह्मा तस्मै वै नमो नम' इत्यादिना देववाक्येन रुद्रस्य सर्वैश्वर्यं सुव्यक्तमुपपादितम्। तथा तृतीयचतुर्थखण्डयोः 'स एको रुद्रः स ईशान स्स भगवान् स महेश्वरः स महादेव' इति तदसाधारणतया अनेकनामनिर्देशतन्निर्वचनमुखेन तदैश्वर्यमेव प्रतिपाद्यते। तथा च पञ्चमे खण्डे 'तदेतद्रुद्रचरितं, एको हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः। स एव जातस्स जनिष्यमाणः [2]प्रत्युङ्जनास्तिष्ठति सर्वतो भवः। तदेतदुपासितव्यम्' इत्यारभ्य, 'वालाग्रमात्रं हृदयस्य

---

1. सर्वेश्वरश्च-क, ख-पाठः।

2. प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः क-पाठः।

मध्ये विश्वं देवं जातवेदं वरेण्यम् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिश्शाश्वती नेतरेषाम्' इति हृदयमध्यवर्तिनो रुद्रस्य मोक्षफलमुपासनमभिधाय, 'व्रतमेतत्पाशुपत' मित्युपक्रम्य, 'अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत् । तस्माद्व्रतमेतत्पाशुपतं पाशविमोक्षायेति' तदङ्गत्वेन च मोक्षप्रदत्वेन च समन्त्रकसर्वाङ्गभस्मसंस्पर्शलक्षणं पाशुपतव्रतमुक्तम् । श्रीरुद्रादयश्च रुद्रप्रभवपराः प्रसिद्धाः । तस्मात् जगत्कारणत्वेन च मोक्षप्रदत्वेन च सर्ववेदान्तवेद्यो भगवान् पशुपतिरेवेति सिद्धम् ॥

तदेवं रुद्रस्य सर्वस्मात्परत्वे प्रत्यक्षश्रुतिसिद्धे पौरुषेयवचसां तदानुगुण्येनैव प्रामाण्यात् तदनुरोधीन्येव शैवानि इतिहासपुराणानि तन्त्राणि च तत्परत्वानि तदुपबृंहणपदवीमधिरोहन्ति । अन्यानि तु प्राजापत्यानि वैष्णवानि च पुराणादीनि प्रत्यक्षश्रुतिविरुद्धतया विरोधे त्वनपेक्षं स्यादि'ति न्यायेनानादरणीयानि । उक्तञ्च मनुना, 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ।' इति ॥ अतः शिवस्सर्वस्मात्परत्वेन सोपबृंहणश्रुतिशतसिद्ध इति निरवद्यम् ॥

अत्रापरे प्रत्यवतिष्ठन्ते— हिरण्यगर्भ एव सर्वस्मात्परो भवितुमर्हतीति । तथाहि—कारणवाक्यगताः सत् - ब्रह्मादिसामान्यशब्दा स्साधारणतया चेतनविशेषे पर्यवसानमपेक्षमाणाः 'हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' इति तुल्यप्रकरणस्थेन हिरण्यगर्भशब्देन विशेषितास्तस्मिन्नेव विशेषे पर्यवस्यन्ति । तथा 'अम्भस्यपारे' इत्यनुवाके 'यस्मिन्निदं संच विचैति सर्वम् । यतः प्रसूता जगतः प्रसूती । न तस्येशे कश्चन तस्य नाम महद्यशः । न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति' इति जगत्कारणत्वेन अनन्येश्वरत्वेन मोक्षप्रदत्वेन च कञ्चित्पुरुषमभिधाय अनन्तरं 'अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टौ' इति पूर्वोक्तेनैकवाक्यतया 'हिरण्यगर्भस्समवर्तताग्र' इति ऋगष्टकमुदाहरद्वाक्यं जगत्कारणत्वेन [1]अनन्यपरत्वेन मोक्षप्रदत्वेन च पूर्वोक्तः पुरुषो हिरण्यगर्भ एवेति स्पष्टयति ॥

ननु 'अद्भ्यस्सम्भूत' इत्यनुवाकश्चात्र पूर्वोक्तेनैकवाक्यतया उदाहृतः । स च 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति लक्ष्मीपतित्वलिङ्गात् नारायणपर इति प्रतीयते । नैवं,

---

[1] अनन्येश्वरत्वेन क. पाठः ।

लिङ्गाच्छ्रुतेर्बलीयस्त्वात् । 'हिरण्यगर्भस्समवर्तताग्रे' इति हिरण्यगर्भशब्दो निरपेक्षो विशेषमुपस्थापयति । एकपदसामर्थ्यं श्रुतिः, वस्तुसामर्थ्यं लिङ्गमिति हि मीमांसकाः । तथा उत्तरत्रापि 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इति जगत्कारणं हिरण्यगर्भशब्दपर्यायतया प्रसिद्धेन धातृशब्देन निर्दिशति । 'प्रजापतिः प्रजा असृजत' इत्याद्याश्च काश्चन कारणविषयाः श्रुतयः प्रजापतिमेव कारणमुपदिशन्ति । तथा छान्दोग्ये दहरविद्यायां 'प्रजापतेस्सभां वेश्म प्रपद्ये' इति मुक्तप्राप्यः प्रजापतिरभिधीयते ।

ननु 'न सन्न चासच्छिव एव केवलः' 'शम्भुराकाशमध्ये ध्येयः' 'यः परस्स महेश्वरः' इत्यादिषु शिवशम्भुमहेश्वरादिशब्दोपस्थापितविशेषपर्यवसायित्वं सद्ब्रह्मात्मादिसामान्यशब्दानामुक्तम् । सत्यमुक्तम्, दुरुक्तन्तु तत् । सद्ब्रह्मादिसामान्यशब्दवत् शिवादिशब्दानामपि साधारणत्वात् । हिरण्यगर्भशब्दस्यासाधारणत्वात् । तथाहि — शिवशब्दस्तावत् 'शिवमस्तु सर्वजगताम् । शिवास्ते सन्तु पन्थानः । शिवं कर्मास्तु । शिवा न शन्तमा भव । शिवशिवानामशिवोऽशिवानाम् । यो वश्शिवतमो रसः ।' इति लोकवेदयोः शुद्धिमाङ्गल्यादिगुणयोगेन अनेकार्थसाधारणतया प्रयुज्यमानो दृश्यते । शम्भुशब्दस्यापि 'शम्भुस्स्वयम्भूर्द्रुहिण' इत्यादिषु द्रुहिणविषयतया प्रयोगो दृष्टचरः । महेश्वरशब्दो महान् ईश्वरः इत्यवयवशक्त्या राजादिषु प्रयुज्यते । रुद्रशब्दोऽपि 'रुद्रो वा एष यदग्निः' 'वीरान्मानो रुद्र भामितोवधी-रित्यादिषु क्रौर्यादिगुणयोगेन अग्न्यादिषु प्रयुक्तो दृष्टः । न चैवं हिरण्यगर्भशब्दस्य चतुर्मुखादन्यत्र प्रयोगो दृष्टचरः । येन शिवादिशब्दवत् साधारण्यं स्यात् । 'एको ह वै नारायण आसीत्' इत्यादिवाक्यन्तु प्रसिद्धवन्निर्देशेनानुवादत्वात् न विशेषोपस्थापनक्षममित्युक्तम् । ततो हिरण्यगर्भ एव मुमुक्षुभिर्जिज्ञास्यं परं ब्रह्मेति वेदान्ताः प्रतिपादयन्तीति प्रसिद्धम् ।

तदुपबृंहणानि चतुर्मुखविषयाण्येव पुराणादीनि । इतराणि श्रुतिविरोधादुपेक्ष्याणि । अत एव भगवान् मनुः 'ततः स्वयंभूर्भगवान्' इति स्वयम्भूशब्देन जगत्कारणन्निर्दिशति । स्वयंभूशब्दश्च चतुर्मुखपर्यायतया प्रसिद्धः । तस्माच्चतुर्मुख एव ब्रह्मतया सोपबृंहणश्रुतिशतसिद्ध इति निरवद्यम् ।

अत्र प्रतिविधीयते । नारायणः परं ब्रह्मेति कारणवाक्येषु तस्यैव [1]कारणत्वप्रतिपादनात्,

---

1, परमकारणत्वश्रवणात् क-पाठः ।

P. 2

मोक्षप्रकरणेषु मुक्तप्राप्यत्वश्रवणाच्च । तथाहि; कारणवाक्येषु सद्ब्रह्मादिशब्दाः साधारणतया विशेष-पर्यवसानाकांक्षाः 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्थस्य एका कन्या दशेन्द्रियाणि' इत्यारभ्य 'अथ पुनरेव नारायणस्सोऽन्यं कामं मनसा ध्यायीत तस्य ध्यानान्तस्थस्य ललाटात् स्वेदोऽपतत् ता इमा आपः तद्धिरण्मयमण्डमभवत् तत्र ब्रह्मा चतुर्मुखो जायते । अथ पुनरेव नारायणस्सोऽन्यं कामं मनसा ध्यायीत तस्य ध्यानान्तस्थस्य ललाटात् स्वेदोऽपतत् स्वेदाद्बुद्बुद-मभवत् बुद्बुदात् त्र्यक्षश्शूलपाणिः पुरुषोऽजायत' इत्यादिमहोपनिषदुपस्थापितनारायण एव पर्यवस्यन्ति ।

ननु इदं वाक्यं अनुवादकमित्युक्तम् । सत्यमुक्तम्, तदेवायुक्तमिति ब्रूमः । शास्त्रस्य अप्राप्तप्रापकत्वस्वाभाव्यात् नारायणकारणत्वस्य प्रमाणान्तराप्राप्तत्वाच्च । नच 'सर्वाणि ह वा इमानि भूतानी'त्यादिषु प्रसिद्धवन्निर्देशादनुवादत्वम्; 'यदाग्नेयोऽष्टाकपालः, उपरि हि देवेभ्यो धारयति' इत्यादिष्वपि अनुवादत्वप्रसङ्गात् । नच तत्र अनुवादत्वम् । 'वचनानि त्वपूर्वत्वात्' 'विधिस्तु धारणेऽपूर्वत्वा'दिति कर्मकाण्डसूत्राभ्यां तेषां विधित्वसमर्थनात् । 'सर्वाणि ह वा इमानि' इत्यादौ तु प्रमाणान्तरेण कार्यतया हेयतया चावगतस्य आकाशादेः परमकारणत्व-परमप्राप्यत्वानुगुण कल्याणगुणवत्त्वादिप्रतिपादनानुपपत्तेः । 'अस्य लोकस्य का गति' रित्युप-क्रमादिना विधेयान्तरप्रतीतेश्च । 'आकाशस्तल्लिङ्गात्' 'अत एव प्राणः' इति शारीरक-सूत्राभ्यामनुवादत्वं जगत्कारणत्वमप्यर्थादुक्तम् । 'यतो वा इमानि भूतानि जायन्ते । असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं लब्ध्वानन्दी भवति' । इत्यादिषु जगत्कारणस्यैव मोक्षप्रदत्वमुक्तम् । प्रसिद्धवन्निर्देशस्य तु अनुवादकत्वसाधकप्रमाणान्तरानुग्राहकत्वमात्रम् । तथाच तत्र प्रसिद्धवन्निर्देशस्यानुवादत्वहेतुतयोक्तिः । एको ह वै नारायण इत्यत्र तु न विधेयान्तर-प्रतीतिः । प्रत्युत नारायणस्यैव परमकारणत्वं विधेयतया प्रतिपाद्यते । नारायणव्यतिरिक्तस्य ब्रह्मरुद्रादेः कृत्स्नस्य जगतः तस्मिन्नेव प्रलयाभिधानात्, तस्मादेवोत्पत्तिवचनाच्च ॥

न च नारायणस्य प्रमाणान्तरेण कार्यत्वमवगतम् । येनाकाशस्य परमकारणत्वं विरुध्येत । ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते इति वचनन्तु न विष्णोः कार्यत्वप्रतिपादन-

परामिति वक्ष्यते । अतो नानुवादत्वमस्य वाक्यस्येति तदुपस्थापिते विशेषे सदादिशब्दाः पर्यवस्यन्ति । अस्तु वानुवादत्वमस्य वाक्यस्य । तथाप्यनुवादलिङ्गरहितसमानरूपानेकश्रुत्यन्तरप्रसिद्धं नारायणकारणत्वम् । अनुवादत्वन्तु न विरूपवाक्यान्तरार्थम् ।

सन्ति च बहून्यौपनिषदानि वचांसि तदेककारणत्वप्रतिपादनपराणि । सुबालोपनिषदि तावत् 'तदाहुः किन्तदासीन्नैवेह किञ्चनाग्र आसीत् । अमूलमनाधारमिमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायण' इत्यादि । पुरुषसूक्ते च 'तस्माद्विराडजायत, विराजो अधिपूरुषः' इत्यादि । नारायणानुवाककठवल्ल्यादिषु च तस्यैव मोक्षप्रदत्वमुक्तप्राप्यत्ववचनेन जगत्कारणत्वमित्यपि अर्थसिद्धम् । 'यतो वा इमानि भूतानि जायन्ते, असद्वा इदमग्र आसीत्' इत्यारभ्य 'रसं ह्येवायं लब्ध्वानन्दी भवति' इत्यादिषु जगत्कारणस्यैव मोक्षप्रदत्वमुक्तप्राप्यत्वप्रतिपादनात् । तस्मान्महोपनिषद्वाक्यस्यानुवादत्वेऽपि न देवतान्तरकारणत्वानुवादत्वप्रसङ्गः ।

प्रसिद्धवन्निर्देशेऽप्यपूर्वार्थप्रतिपादनान्नानुवादत्वमित्युक्तम् । श्रुत्यन्तराणि च एवंविधानि दृश्यन्ते । यथा नारायणोपनिषदि 'अथ पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति, अथापस्ससर्ज, नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रो जायते, नारायणात्प्रजापतिः प्रजायते, नारायणादिन्द्रो जायते, नारायणात् द्वादशादित्या रुद्रा [1]वसवस्सर्वे देवास्समुत्पद्यन्ते सर्वे लोकास्सर्वाणि भूतानि नारायणादेव समुत्पद्यन्ते नारायणे प्रलीयन्त' इति । महोपनिषदि च 'सर्वस्य वशिनं देवं सर्वस्यायतनं हरि' मित्यारभ्य 'यन्नाभिपद्मादभवन्महात्मा प्रजापतिर्विश्वसृड्विश्वरूपः । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था अयनाय विद्यते' इति । अतः कारणवाक्येषु परमकारणतया नारायण एव प्रतिपाद्यत इति निश्चीयते ।

'न सन्न चासच्छिव एव केवलः' इत्यत्र कारणविषयः शिवशब्दोऽपि सद्ब्रह्मादिशब्दवत् नारायणमभिधत्ते । उक्तरीत्या नारायणस्यैव कारणत्वनिश्चयात् । 'शाश्वतं शिवमच्युत' मित्यादिषु शिवशब्दस्य तस्मिन्नपि दृष्टप्रयोगत्वात् । रुद्रव्यतिरेकेणानेकार्थेषु प्रयोगः प्रागेव दर्शितः । नचैवं **नारायणशब्दस्य अर्थान्तरे प्रयोगो दृष्टचरः** । अतः शिवशब्दस्य साधारणतया सावकाशत्वात्, नारायणशब्दस्य तद्विपर्ययात्, नारायणकारणत्वस्य बहूपनिषद्घोष-

1. वसवः प्रजापतयश्च सर्वा देवतास्समुत्पद्यन्ते क-पाठः ।

दर्शनात्, शिवशब्दोपेतकारणवाक्यस्य [1]चाल्पत्वात्, नारायणशब्दोपेतस्य च बहुत्वात्, नारायणशब्दस्य एकैकस्यामुपनिषदि बहुशोऽभ्यस्यमानत्वात्, शिवशब्दस्य तदभावात्; आकाशप्राणादिवत् 'न ब्रह्मा नेशानः, बुद्बुदात् त्र्यक्षश्शूलपाणिः पुरुषोऽजायत; नारायणाद्रुद्रो जायते, स्थाणुरव्यक्तादभवन्महेशः.। ऋग्वेदे 'यतो जज्ञ उग्रस्त्वेष नृम्ण' इत्याद्यनन्यपरानेकश्रुत्यन्तरेषु कार्यतया प्रतिपन्नस्य प्रसिद्धशिवस्य परमकारणत्वप्रतिपादनानुपपत्तेः, नारायणस्य तदभावाच्च, सर्वकारणवाक्येषु स एव परमकारणतया प्रतिपादनमर्हति। 'अस्य देवस्य मीढुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्व'मिति बह्वृचश्रुत्या रुद्रस्य भगवत्समाराधनलब्धस्वमहिमत्वं प्रतीयते। तस्मान्नारायण एव परमकारणं न रुद्र इति निरवद्यम्।

यत्तु 'हिरण्यगर्भस्समवर्तताग्रे' इति हिरण्यगर्भस्य कारणत्वं प्रतीयते इति, तदसत्। आकाशादिवत् प्रमाणान्तरेण कार्यतयावगतस्य परमकारणत्वासम्भवादेव। दृश्यन्ते हि तस्य कार्यत्वप्रतिपादनपराण्यौपनिषदानि वाक्यानि। श्वेताश्वतरोपनिषदि 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' 'यन्नाभिपद्मादभवन्महात्मा प्रजापति'रिति। श्रुत्यन्तरेषु 'तत्र ब्रह्मा चतुर्मुखोऽजायत, नारायणाद्ब्रह्मा जायते।' यजुषि च 'स प्रजापतिरेकः पुष्करपर्णे समभवत्, ब्रह्म वै ब्रह्माणं पुष्करेऽसृजत्। विराजो अधिपूरुषः' इत्यादीनि। अतः कारणविषयहिरण्यगर्भशब्दोपि आकाशादिशब्दवदवयवशक्त्या अपर्यवसानवृत्त्या वा नारायणे वर्तते।

किंच 'अम्भस्यपारे' इत्यनुवाके 'यमन्तस्समुद्रे कवयोऽवयन्ति' 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' इत्याद्यधिकत्व समुद्रशायित्व विद्युद्वर्णत्व पुरुषत्वलिङ्गविशेषावधारितनारायणभावं पुरुषं जगत्कारणतया अभिधाय 'न तस्येशे कश्चन तस्य नाम महद्यशः' 'य एनं विदुरमृतास्ते भवन्ति' इति तस्यैवानन्येश्वरत्वं मोक्षप्रदत्वं चोक्तं। 'अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टा'विति पूर्वेणैकवाक्यतया 'हिरण्यगर्भस्समवर्तताग्रे' इत्यष्टर्चमुदाहरद्वाक्यं तस्य हिरण्यगर्भशब्दस्य नारायणविषयतां दर्शयति।

अपि च हिरण्यगर्भ इत्यादेः 'अद्भ्यस्सम्भूत' इत्यनुवाकेनाप्येकवाक्यत्वावगमात् तस्य च 'ह्रीश्च ते लक्ष्मीश्च पत्न्या' विति लक्ष्मीपतित्वलिङ्गात् पुरुषसूक्तप्रकरणाच्च नारायण-

1. चान्वयस्य चैकत्वात् क-पाठः।

परत्वनिर्णयात् हिरण्यगर्भशब्दो नारायणमभिधत्त इत्यध्यवस्यते। यथोक्तं लिङ्गाच्छुनेर्वलीयस्त्वाद्धिरण्यगर्भशब्दश्चतुर्मुखपर इति। तदयुक्तम्। कारणविषयहिरण्यगर्भशब्दस्य कार्यभूतचतुर्मुखगोचरत्वासंभवेन श्रुतेरसिद्धत्वात्। एकपदसामर्थ्यं हि श्रुतिः। तदभिना सिद्धेदिविवदयोग्यार्थत्वे न सम्भवति।

ननु पुरुषसूक्तस्य नारायणपरत्वे किं प्रमाणम्? उच्यते, नारायणानुवाकोक्त सहस्रशीर्षत्व विश्वाक्षत्व पुरुषत्वादि लक्षणप्रत्यभिज्ञापकं पुरुषसूक्तं नारायणपरमेव भवितुमर्हति। सुबालोपनिषदि 'चक्षुश्च द्रष्टव्यञ्च नारायण' इत्यारभ्य नारायणस्य सर्वात्मकत्वं प्रतिपाद्य 'पुरुष एवेदं सर्व'मिति पुरुषशब्देन निगमनात् पुरुषसूक्तं नारायणपरमिति अवगम्यते। आथर्वणे च अष्टादशमहाशान्तिप्रकरणे, तत्तद्देवताविषयमहाशान्तौ तत्तद्देवताकमन्त्रविनियोगावसरे, 'वैष्णव्यां पुरुषसूक्त'मिति वैष्णवमहाशान्तिमन्त्रत्वेनास्य विनियोगात् विष्णुविषयत्वं प्रतीयते। एतदेकवाक्योत्तरानुवाकोक्तलक्ष्मीपतित्वलिङ्गाच्चास्य तद्विषयत्वनिश्चयः। कल्पसूत्रकारश्च "सहस्रशीर्षा पुरुषः" इत्युपहितां पुरुषेण नारायणेन नारायणाभ्यामुपस्थानमुत्तरेण नारायणेनादित्यमुपतिष्ठत इति चास्य सूक्तस्य नारायणविषयतां दर्शयति। "पुरुषस्य हरेस्सूक्तं स्वर्ग्यं धन्यं यशस्कर"मिति स्मृतेश्च हरिविषयत्वमेवास्यावसीयते। उक्तेनैव न्यायेन "धाता यथापूर्वमकल्पयत्" इत्यत्र धातृशब्दः परमकारणपरत्वेन नारायणपरो द्रष्टव्यः। अवान्तरसृष्टिकारणपरत्वे तु चतुर्मुखपरत्वेऽपि न विरोधः। "प्रजापतिः प्रजा असृजते"त्यत्र तथैव।

यत्तु "प्रजापतेः सभां वेश्मे"ति मुक्तप्राप्यत्वेनोक्तश्चतुर्मुखरूप इति। तदयुक्तम्। नारायणानुवाककठवल्ल्यादिषु नारायणस्यैव मुक्तप्राप्यत्वश्रवणात्। दहरविद्यायाञ्च तत्परत्वस्य वक्ष्यमाणत्वेनास्य तदुपसंहारगतत्वेन तद्विषयत्वस्य युक्तत्वात्। प्रजापतिशब्दस्य अवयवशक्त्या चतुर्मुखसृष्टदक्षादिष्वपि प्रयुक्तस्य 'पतिं विश्वस्यात्मेश्वर' मित्याद्युक्त[1]नारायणवाचित्वसम्भवात्। तदेतत्सूत्रकारेण 'नच कार्ये प्रत्यभिसन्धि'रिति प्रतिपादितम्। "ततस्स्वयम्भूर्भगवा"नित्यत्र स्वयम्भूशब्दो नारायणपरः। अस्य कारणविषयत्वात्, उक्तरीत्या नारायणस्यैव कारणत्वनिर्णयात्, वासुदेवैकवाचिभगवच्छब्दसामानाधिकरण्याच्च। 'तेन नारायणः स्मृतः। तद्विसृष्टस्स पुरुष' इति नारायणचतुर्मुखयोस्स्रष्टृसृज्यत्वप्रतिपत्तेश्च। अतो नारायण एव कारणम्, न चतुर्मुखादिः।

---

1. नारायणानुवादत्वसंभवात् -ख-पाठः।

किञ्च 'सहस्रशीर्षन्देव' मित्यारभ्य 'स ब्रह्मा स शिवस्सेन्द्रस्सोक्षरः परमस्वराडि'त्यन्तो नारायणानुवाकः सर्वशाखासु परतत्त्वप्रतिपादनपराणां शंभ्वक्षरब्रह्मादिशब्दानां नारायणविषयत्वं न्यायनिरपेक्षं कण्ठोक्त्या निर्णयन् परत्वेन शङ्कितयोर्ब्रह्मशिवयोरपि इन्द्रादितुल्यतया तद्विभूतित्वं प्रतिपादयति। अयञ्चानुवाकः सर्ववेदान्तोदितसर्वपरविद्योपास्यविशेषनिर्धारणविधिपरः नतु प्रकृत-दहरविद्यामात्रोपास्यविशेषनिर्धारणपर इति लिङ्गभूयस्त्वादित्यस्मिन्नधिकरणे निरणायि। नच 'नारायणपरं ब्रह्म, नारायणपरो ज्योति'रिति वाक्ययोः पञ्चमीसमासश्शङ्कनीयः 'विश्वन्नारायणं हरि'मित्यारभ्य '[1]आत्मा नारायणः परः' 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, स ब्रह्मा स शिवस्सेन्द्र' इत्यादिभिर्नारायणस्यैव सर्वस्मात्परत्वेन निर्णीयमानत्वात्, तस्मादन्यस्य परत्वासम्भवात्। अतस्सुपां सुलुगिति लुप्तप्रथमाविभक्तिकोऽयन्निर्देशः। महोपनिषच्चेमं संशयं व्युदस्यति। 'नारायणः परं ब्रह्म तत्त्वं नारायणः परः, नारायणः परो ज्योतिरात्मा नारायणः परः' इति सविभक्तिकं ब्रवीति। समासत्वेऽपि निषादस्थपतिन्यायेन पञ्चमीसमासात् समानाधिकरणो न्याय्यः। तस्मादस्मिन्ननुवाके सर्ववेदान्तेषु मुमुक्षुभिरुपास्यत्वेन मोक्षप्रदत्वेन मुक्तप्राप्यत्वेन जगत्कारणत्वेन जगदन्तरात्मत्वेन च प्रसिद्धं परब्रह्मादिसामान्यशब्दनिर्दिष्टं वस्तु तत्प्रत्यभिज्ञापकैस्तैरेव शब्दैरनूद्य तस्य नारायणत्वं विधीयते। यथा 'जुह्वा जुहोती'ति होमसाधनतया विहितां जुहूं 'यस्य पर्णमयी जुहूर्भवती'ति वाक्येन तत्प्रत्यभिज्ञापकजुहूशब्देनानूद्य तस्याः पर्णमयत्वं विधीयते। मैत्रायणीयोपनिषदि च 'तत्सवितुर्वरेण्यं[2] ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धामे'ति ध्रुवत्वा-चलत्वामृतत्वसर्वाधारत्वविशिष्टतया सर्ववेदान्तप्रसिद्धं परं ब्रह्म विष्णुसंज्ञमिति गीयते। कठवल्लीषु चायमर्थः स्पष्टतया प्रतीयते। 'सर्वे वेदा यत्पदमामनन्ति, तत्ते पदं संग्रहेण ब्रवीमी'त्यारभ्य 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद' मित्यन्तेनात्र सर्ववेदान्तप्रतिपाद्यं परमप्राप्यं यद्वस्तु तद्वैष्णवं पदमिति कण्ठोक्त्या निर्णीयते। ईदृशानि वेदान्तवाक्यानि परश्शतानि विस्तरभयान्न लिख्यन्ते। अतो नारायण एव परं ब्रह्म।

यदुक्तम् श्वेताश्वतरोपनिषदि 'ततो यदुत्तरतर' मित्यादिना रुद्रस्य नारायणात्परत्वं मोक्षप्रदत्वं च प्रतिपाद्यत इति। तदयुक्तम्। उपक्रमविरोधात्। उपक्रमे हि 'वेदाहमेतं पुरुषं

1. तत्त्वं नारायणः परः-ख-पाठः।
2. वरेणियं-ख-पाठः।

महान्त' मिति महापुरुषमभिधाय 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था[1] विद्यतेऽयनाय इति तद्वेदनस्यैव मोक्षप्रदत्वं नान्यस्येत्यर्थद्वयं प्रतिज्ञातम्। अनन्तरञ्च तदुपपादनाय 'यस्मात्परं नापरमस्ति किञ्चि' दित्यादिना स एव सर्वस्मात्परो नान्य इति प्रतिपादितम्। यस्मादपरं किञ्चिदपि परन्नास्तीत्यन्वयः। निरस्तसमाभ्यधिकसम्भावन इत्यर्थः। अन्यथा हि प्रतिज्ञानुगुण्यं न स्यात्। तथा च श्रुतिः 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति। अतः 'ततो यदुत्तरतर'मिति तस्मादन्यस्य परत्वप्रतिपादनं विरुध्येत। उपक्रमस्यैव उपसंहाराद्बलीयस्त्वमुपक्रमाधिकरणसिद्धम्। तथा हि 'उच्चैर् ऋचा क्रियते, उपांशु यजुषा उच्चैस्साम्ना' इत्यत्र उच्चैस्त्वादिः किमृगादिमन्त्रमात्रधर्मः उत तत्तन्मन्त्रप्रायवेदधर्मः इति संशय्य, मन्त्रवाचकऋगादिशब्दस्वारस्यानुरोधेन मन्त्रधर्मत्वमेव युक्तम्। उपक्रमगतवेदशब्दस्तु वेदयतीति व्युत्पत्त्या अनुष्ठेयार्थप्रकाशकमन्त्रमात्रपरो भवितुमर्हति। वेदशब्दस्वारस्यानुरोधेन वेदधर्मत्वे लाक्षणिकत्वमेव ऋगादिपदानां स्यात्। अतो मन्त्रधर्मः उच्चैस्त्वादिरिति पूर्वपक्षिते, मन्त्रब्राह्मणसमुदायरूपवेदधर्मत्वमुच्चैस्त्वादेरुपक्रमस्वारस्याद्युक्तम्। उपक्रमो ह्यसञ्जातविरोधितया चरमभाविन उपसंहाराद्बलीयान्। यथा वह्न्यौष्ण्यग्राहिप्रत्यक्षं तद्विरोध्यनुमानात्। यथा च श्रुतिलिङ्गादिषु पूर्वपूर्वमुत्तरोत्तरात्। अतो बलवदुपक्रमस्वारस्यानुरोधेन दुर्बलोपसंहारगतऋगादिपदलक्षणा युक्तेति वेदधर्मत्वमेव उच्चैस्त्वादेरिति सिद्धान्तितम्। अत उपक्रमविरोधा 'ततो यदुत्तरतर' मिति वाक्यं परमपुरुषादन्यस्य परत्वं न प्रतिपादयति।

यदुच्यते, सामान्यशब्दो हि विशेषसन्निधौ संकुचितार्थो दृष्टः। यथा गामानय बलीवर्दञ्चेति। इह च 'ततो यदुत्तरतर'मित्यादिना परमपुरुषव्यतिरिक्तस्य कस्यचित्परत्ववचना 'न्नान्यः पन्थाः, यस्मात्परन्नापरमस्ति किञ्चि'दिति सामान्येन परमपुरुषव्यतिरिक्तसर्वविषयतया प्रतीयमान परत्वनिषेधस्तद्व्यतिरिक्तविषयो भवितुमर्हतीति। तन्न, न ह्यत्र गोबलीवर्दन्यायः क्रमते। समभिव्याहृत[2]पदान्तरवैयर्थ्यपरिहाराय पदान्तरार्थसंकोचो हि गोबलीवर्दन्यायः। न चात्र 'नान्यः पन्थाः यस्मात्परन्नापर'मित्यनयोरसंकोचे 'ततो यदुत्तरतर'मित्यस्य वैयर्थ्यप्रसङ्गः। प्रतिज्ञातस्यैव सहेतुकनिगमनेनार्थान्तरपरत्वसम्भवात्। किञ्च 'तस्मात्सर्वगतश्शिव' इत्युक्त्वा 'महान् प्रभुर्वै पुरुषस्सत्त्वस्यैष प्रवर्तक' इति मोक्षोपयोगिसत्त्वप्रवर्तकत्वेन महापुरुषमेव 'वेदाहमेतं पुरुषं

1. अयनाय विद्यते — क. पाठः।
2. शब्दान्तरवैयर्थ्यपरिहाराय — ख. पाठः।

महान्त' मित्युपक्रान्तं प्रत्यभिज्ञापयति। तथा च मैत्रायणीयोपनिषदि सत्त्वप्रवर्तकत्वं विष्णोरसाधारणधर्मतया श्रूयते 'अथ यो ह खलु वा अस्य राजसोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं ब्रह्मा, अथ यो ह खलु वा अस्य सात्त्विकोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं विष्णुः, अथ यो ह खलु वा अस्य तामसोंऽशस्सोऽसौ ब्रह्मचारिणो योऽयं रुद्र इति'। इह च पूर्वस्मिन् वाक्ये 'सर्वाननशिरोग्रीवस्सर्वभूतगुहाशयः। सर्वव्यापी च भगवान् तस्मात्सर्वगतश्शिवः' इति पुरुषसूक्तनारायणानुवाकादिषु परमपुरुषासाधारणधर्मत्वेन प्रसिद्धसर्वाननशिरोग्रीवत्वादिदर्शनात्स एवेति प्रत्यभिज्ञायते। ततश्चास्मिन्प्रकरणे परमपुरुष एव प्रतिपाद्यत इति 'तस्मात्सर्वगतश्शिव' इति शिवशब्दोऽपि शुद्धिगुणयोगेन तस्मिन्नेव प्रवर्तते। दृष्टश्चान्यत्रापि 'शाश्वतं शिवमच्युत' मिति तस्मिन् शिवशब्दप्रयोगः।

यत्तोक्तं छान्दोग्ये दहरविद्यायां 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं' इत्यादिना नामरूपनिर्वोढृत्वविशेषिताकाशशब्देन परमपुरुषान्निर्दिश्य तदन्तर्वर्तिनः कस्यचित् तत्त्वान्तरस्य उपास्यत्वमुक्तमिति। तदप्यश्रोत्रियाणां श्रद्धामात्रविजृम्भितम्। यतः श्रुतिरेव इदं प्रश्नपूर्वकं परिहरति। तथाहि, 'दहरोऽस्मिन्नन्तर आकाशः तस्मिन् यदन्तः तदन्वेष्टव्यम्; तद्वाव विजिज्ञासितव्यमि' त्युक्ते, 'किन्तत्र विद्यते यदन्वेष्टव्यम्, यद्वाव विजिज्ञासितव्यमि'ति परिचोद्य, तत्परिजिहीर्षया 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वन्तदस्मिन् समाहितम् नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुर'मिति। प्रकृतस्य दहराकाशस्यातिमहत्त्वसर्वाधारत्वादिकमभिधाय 'अस्मिन्कामास्समाहिता'इति तदन्तर्वर्तिनः उपास्यतयोक्ता गुणाः कामा इति परिहृत्य, कोऽयन्दहराकाशः के च तदाश्रयाः कामा इत्यपेक्षायां "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्प'इति दहराकाशशब्दनिर्दिष्टः परमात्मा तदाश्रयाश्च काम्यतया कामशब्दनिर्दिष्टा अपहतपाप्मत्वादयः सत्यसङ्कल्पत्वपर्यन्तास्तद्गुणा इति स्फुटीकृत्य, 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवति' इत्यपहतपाप्मत्वादिगुणाष्टकविशिष्टं परमात्मानं विदुषामविदुषाञ्च सत्यसंकल्पत्वोपलक्षितमोक्षसिद्ध्यसिद्धी दर्शयति। तदेतद्वाक्यकारेणैव सुव्यक्तमुपपादितम् 'तस्मिन् यदन्तरिति कामव्यपदेश'इत्यादिना।

कथन्तर्हि 'तस्मिन् यदन्तः तदन्वेष्टव्यम्' इति उपक्रमे दहराकाशान्तर्वर्तिमात्रस्योपासनविधानमुपपद्यत इति? उच्यते। नात्र तदन्तर्वर्तिमात्रोपासनं विधीयते। किन्तु उभयोपासनम्। 'अथ य इहात्मान मनुविद्ये'त्यादिना उभयोपासननिगमनात्। किं पुनरत्रोभयोपस्थापकम्? तदन्वेष्टव्यमिति तच्छब्द इति ब्रूमः। कथन्तर्हि तस्मिन् यदन्तारिति तदन्तर्वर्तिमात्रगोचरयच्छब्दनिर्दिष्टपरामर्शिनस्तच्छब्दस्योभयोपस्थापकत्वं? तदुच्यते। तस्मिन् यदन्तारिति यच्छब्दोऽप्युभयविषय एव। किन्तत्र विद्यते यदन्वेष्टव्यमिति, तस्मिन् यदन्तारिति वाक्यस्यायमर्थः— हृदयपुण्डरीकमध्यवर्ती यो दहराकाशः यच्च तदन्तर्वर्तिगुणजातमिति। तत्कथं एकेन यच्छब्देनोभयपरामर्शः? लिङ्गद्वयविषयस्य वा कथमेकलिङ्गत्वम्? उभयार्थस्य वा कथमेकवचनान्तत्वम्? एतत्सर्वं भगवान् पाणिनिः परिहरति; 'त्यदादीनि सर्वैर्नित्यम्, नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति; सर्वैश्शब्दैस्समभिव्याहारे त्यदादीनां नित्यमेकशेषत्वं, नपुंसकानपुंसकशब्दद्वयसन्निपाते नपुंसकैकशेषतां तस्य च विकल्पेनैकवद्भावं ब्रुवन्। तदन्तर्वर्तिगुणविषयस्य यच्छब्दस्य एकवचनान्तत्वं जात्यभिप्रायम्। 'अस्मिन् कामास्समाहिता' इत्यत्र बहुत्वावगमात्।

ननु प्रथमश्रुतैकवचनस्वारस्यानुरोधेन 'अस्मिन् कामा' इति बहुवचनस्य 'अदितिः पाशानि'तिवदविवक्षास्तु। मैवम्, तस्मिन् यदन्तरित्येकवचनस्योद्देश्यगतत्वेन अस्मिन् कामा इति बहुवचनस्योपादेयगतत्वाच्च। उपादेयगतयोर्हि लिङ्गवचनयोर्विवक्षितत्वं, उद्देश्यगतयोश्चाविवक्षितत्वं ग्रहाधिकरणे निरणायि। नचोपक्रमस्वारस्यावगतगुणमात्रोपासनविध्यनुरोधेनोपसंहारावगतगुण्युपासनाविधिभङ्ग इशङ्कनीयः। उपक्रमावगतगुणोपासनविध्यबाधेन गुण्युपासनोपसंहारात्। उपक्रमाधिकरणे हि उपक्रमावगतस्य उपसंहारेण बाधो न युक्त इत्युक्तम्। अतोऽस्मिन्वाक्ये परमपुरुषस्यैवापहतपाप्मत्वादिगुणाष्टकविशिष्टस्योपास्यत्वप्रतिपादनान्नान्यस्य कस्यचिदुपास्यत्वप्रतीतिरिति स्थितम्।

यदप्युक्तम्, तैत्तिरीयदहरविद्यायां 'दहरं विपाप्म' मित्यादिना परमपुरुषव्यतिरिक्तस्य तदन्तर्वर्तिनः कस्यचित्तत्त्वस्योपास्यत्वमुक्त्वा, तद्विशेषजिज्ञासायां 'यः परस्स महेश्वर' इति विशेषनिर्णयश्च क्रियत इति। तदप्ययुक्तम्। सर्ववेदान्तप्रत्ययन्यायेनास्य दहरविद्यावाक्यस्य छान्दोग्यदहरविद्यावाक्येनैकार्थ्यात्, तस्य चापहतपाप्मत्वादिगुणाष्टकविशिष्टपरमपुरुषविषयत्वनिर्णयादस्यापि गुणाष्टकविशिष्टपरमपुरुषोपासनविधिपरत्वनिश्चयात्। अत एव 'यः परस्स महेश्वर' इति महेश्वरशब्दोऽपि महानीश्वर इत्यवयवशक्त्या सर्वेश्वरे तस्मिन्नेव वर्तते। किंच यद्वेदादावित्यादिना

सर्ववाचकजातप्रकृतिभूताकारवाच्यतया प्रसिद्धं यच्छब्देनानूद्य तस्य महेश्वरत्वमत्र प्रतिपाद्यते। अकारवाच्यतया प्रसिद्धश्च अकारो विष्णुवाचक इत्यादिभिर्विष्णुरेव। अकारो वै सर्वा वागिति चाकारस्य सर्ववाचकजातप्रकृतिभूतत्वं श्रूयते। अ इति ब्रह्मेति श्रुत्या ब्रह्मणोऽकारवाच्यत्वाव-गमादनन्यपरनारायणानुवाककारणवाक्यादिभिर्नारायणस्यैव परब्रह्मत्वनिर्णयाच्च स एवाकारवाच्य इति निश्चीयते। अतश्चाकारवाच्यतया प्रसिद्धो नारायण एवात्र महेश्वरशब्देनाभिधीयते। अनन्तरञ्च नारायणानुवाके तस्यैव सर्वेश्वरत्वं ब्रह्मशिवयोस्तद्विभूतित्वञ्च प्रतिपाद्यते।

यच्च बृहदारण्यके 'य एषोऽन्तर्हृदय आकाश' इत्यादिना आकाशशब्देन भगवन्तमुक्त्वा तदन्तर्वर्तितया ईशानशब्देन रुद्रः प्रतिपाद्यत इत्युक्तम्। तदपि न साधीयः। अत्राकाश-शब्दस्य परमपुरुषवाचित्वाभावात्। तदभावश्चाकाशशब्दस्य भूताकाशप्रसिद्धिप्राचुर्यात् तस्यैव स्वतः प्रतीतेः। तदपवादहेतोश्च परमपुरुषासाधारणधर्मान्वयस्यादर्शनात्। हृदयान्तर्वर्तित्वन्तु 'तस्यान्ते सुषिरं सूक्ष्म'मिति हृदयावच्छिन्नसुषिरशब्दवाच्यभूताकाशस्यापि श्रूयते। किञ्च परम-पुरुषगुणान्वयाद्धि 'दहरोऽस्मिन्नन्तर आकाश' इत्यत्राकाशशब्दस्य तद्वाचित्वनिश्चयः। इह त्वाकाशे शयानस्य वशित्वादितद्गुणान्वयश्रवणात्स एव परमपुरुषो न तदाश्रय आकाशशब्द-निर्दिष्ट इत्यवसीयते। 'तत्रापि दहं गगनं विशोक' इत्यत्रापि अपहतपाप्मत्वाद्यन्यतमविशोकत्व-श्रवणेन गगनशब्दस्य परमपुरुषपरत्वावगमः। [1] अतो न देवतान्तरपरत्वप्रत्ययः।

यच्चोक्तम्, अथर्वशिखायां 'कारणन्तु ध्येय' इत्यादिना आकाशाख्यपरमपुरुषान्तर्वर्तिनः शम्भुशिवनाम्नो रुद्रस्योपास्यत्वप्रतीतिरिति। तदप्युक्तरीत्या आकाशशब्दस्य हृदयाकाशवाचित्वेन परमपुरुषपरत्वाभावात्तदन्तर्वर्तिनश्च कारणत्वादिभगवदसाधारणगुणान्वयश्रवणात्, शम्भुशिव-शब्दयोश्च रुद्रादन्यत्राऽपि लोकवेदयोः प्रयोगदर्शनात्, 'विश्वाक्षं विश्वशम्भुवं' 'शाश्वतं शिवमच्युत'मिति नारायणेऽपि दृष्टप्रयोगत्वाच्च नारायणस्यैवात्र ध्येयत्वावगमादयुक्तम्। किञ्चा-ऽस्मिन्वाक्ये कश्च ध्येयः इत्युपक्रम्य 'कारणन्तु ध्येयः' इति कारणत्वानुवादेन तस्य ध्येयत्व-विधानावगमात्, अनुवादस्य च प्राप्त्यपेक्षत्वात्तत्प्रापकमहोपनिषदादिषु च नारायणस्यैव कारणत्वनिर्णयात् स एवात्र ध्येयतया विधीयत इति निश्चीयते। अत एवात्र ध्यायीतेशान-मिति ध्येयतयोक्त ईशानः, पतिं विश्वस्येत्यादिप्रसिद्धो नारायण एव। यः पुनरत्र 'ब्रह्मविष्णु-

1. अतो नात्रापि देवतान्तरस्योपास्यत्वप्रतीतिः–ख पाठः।

रुद्रेन्द्रास्ते सर्वे संप्रसूयन्त' इति विष्णोः कार्यमध्ये निवेशः; स चास्य वाक्यस्य उक्तनीत्या कारणैकध्येयत्वविधिपरतया संप्रसूयन्त इति श्रुत्यन्तरप्रसिद्धोत्पत्त्यनुवादत्वावगमात्, श्रुत्यन्तरेषु ब्रह्मादीनां कर्मनिमित्तसृज्यत्वलक्षणोत्पत्तिप्रसिद्धेः, भगवतश्च 'अजायमानो बहुधा विजायते' इत्यादिषु जगदुपकारार्थं स्वेच्छावताररूपजन्मावगमात्, अत्राऽपि इन्द्रानुजरामकृष्णादिवत् ब्रह्म-रुद्रमध्यगतविष्णुत्वेनावतार इत्यवगन्तव्यम्। तथा च महाभारते पञ्चमवेदे 'रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवानि'ति। अत्र च ध्येयत्वविधिपरे वाक्ये [1]तदुक्तिर्ध्येयत्वोपयोगिसौलभ्य-प्रदर्शनाय।

यत्तु 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यत्र परमव्योमशब्देन भगवन्तं निर्दिश्य तदाधेय-तयोपास्यं ब्रह्म प्रतिपाद्यत इति। तदप्यसारम्। अत्राऽपि ब्रह्मण एव ध्येयस्य 'तस्माद्वा एतस्मादात्मन आकाशस्संभूतः' 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः' 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इत्यादिषु जगत्कारणत्वजगदन्तरात्मत्वादित्य-मण्डलान्तर्वर्तित्वादिभगवदसाधारणधर्मसम्बन्धश्रवणात्, आधारस्य च परमव्योम्नस्तद्-भावात्तस्यैवोपास्यत्वप्रतीतेः। अत्र परमव्योमशब्दस्तु 'तदक्षरे परमे व्योमन्' 'तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः' 'हिरण्मये परे लोके विरजं ब्रह्म निष्कळ'मित्यादिश्रुत्यन्तरप्रसिद्ध-भगवद्दिव्यलोकपरः।

यत्त्वथर्वशिरसि प्रथमे खण्डे रुद्रेण स्वस्य सर्वैश्वर्यं घोषितं, तत् 'सोऽन्तरादन्तरं प्राविशदि'ति परमात्मानुप्रवेशादुक्तमिति श्रुत्यैव व्यक्तमुक्तम्। तथाहि, 'सोऽन्तरादन्तरं प्राविश' दिति रुद्रवाक्ये 'स' इति परोक्षनिर्देशस्यारस्यात्, 'प्राविशदि'ति प्रथमपुरुषनिर्देशाच्च रुद्रादन्यः परमात्मा रुद्रस्य अन्येषाञ्चान्तरात्मतया स्थित इति प्रतीयत इति। न च वाच्यं 'नान्यः कश्चिन्मत्तो व्यतिरिक्त इती'ति शब्देन रुद्रवाक्यसमाप्त्यवगमात् रुद्रव्यतिरिक्तस्य परमात्मनो-ऽप्रस्तुतत्वेन स इति तच्छब्देन परामर्शायोगात् प्रस्तुतस्य रुद्रस्य परामर्शसम्भवाच्च 'सोऽन्तरा-दन्तरं प्राविश'दिति वाक्यं न रुद्रवाक्यं, अपितु वेदवाक्यमेव, तत्र च रुद्र एवात्मतया प्रविष्टः परमात्मेति प्रतिपाद्येत, न रुद्रव्यतिरिक्तः कश्चिदिति। सोऽहमित्यादिप्रपञ्चेन रुद्रवाक्या-समाप्तिप्रतीतेः, इतिशब्दस्य हेतुप्रकारयो[2]रन्यतरवाचित्वसम्भवाच्च, सोऽन्तरादन्तरमिति वाक्यस्य रुद्रवाक्यतावगमात्, 'अहमेवैकः प्रथममास'मित्यादिना सर्वात्मभूतपरमात्मनस्स्वात्मतया रुद्रेण

1. विष्णूक्तिः-क-पाठः। 2. रन्यतरार्थत्वसम्भवाच्च-ख-पाठः।

प्रस्तुतत्वात् स इति तच्छब्देन परामर्शसम्भवाच्च, सोन्तरादितिवाक्येन रुद्रव्यतिरिक्तस्यैव परमात्मनो रुद्राद्यन्तरात्मत्वेन प्रवेशनिश्चयात्। अतो रुद्रादन्यस्तदन्तरात्मा नारायण एव रुद्रवाक्ये अहंशब्देन सर्वात्मत्वेन निर्दिश्यत इति निश्चीयते। सोन्तरादिति वाक्यस्य श्रुतिवाक्यत्वेऽपि पूर्वोक्तानन्यपरानेकश्रुत्यन्तरानुरोधात् 'प्राविशदिति' 'यस्य यस्य हि यो भावस्तेन तेन हि तन्नरम्। अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेदि'त्यादिवद्बुद्ध्यनुप्रवेश परत्वसम्भवाच्चानेन वाक्येन रुद्र एव सर्वान्तरात्मानं भगवन्तं समाधिना प्राविशन् साक्षात्-कृतवानित्युच्यत इत्यवसीयते। अतोऽस्मिन्वाक्ये [1]स्वान्तरात्मा नारायण एव रुद्रेणाहमिति निर्दिश्यते।

तथा कौषीतकिब्राह्मणे प्रतर्दनविद्यायां 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगामे'त्यादौ 'त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस' इति मोक्षोपायं पृच्छते प्रतर्दनाय 'मामेव विजानीहि प्राणोऽस्मि प्रज्ञात्मा तम्मामायुरमृतामित्युपास्स्वे'ति वदन्निन्द्रस्स्वान्तरात्मपरमात्मोपासनं मोक्षसाधनमित्युपदिशति। यथा च श्रुत्यन्तरे — 'तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र' इत्यादिना ब्रह्मणस्सर्वान्त-रात्मत्वं सर्वशब्दानां तत्पर्यवसायित्वं च, 'यस्य पृथिवी शरीरं', 'यस्यात्मा शरीरं,' 'एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः,' 'तदैक्षत बहु स्यां प्रजायेये'त्यारभ्य 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' 'सोऽकामयत बहु स्यामि'त्युपक्रम्य 'तदनुप्रविश्य, सच्च त्यच्चाभवदि'त्यादिश्रुतिप्रसिद्धं समाधिना साक्षात्कुर्वन्वामदेवः, अहं-शब्देन स्वान्तरात्मानं परमात्मानं निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्यादीन् व्यपदिशति। तथा च प्रह्लादः —

'सर्वगत्वादनन्तस्य स एवाहमवस्थितः।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने'॥

इत्यादि। एतत्सर्वं 'शास्त्रदृष्ट्या तूपदेशो वामदेववदि'त्यस्मिन्नधिकरणे सूत्रकारेण निरणायि। महाभारते च —

'विष्णुरात्मा भगवतो भवस्यामिततेजसः।
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः'॥

1. सर्वान्तरात्मा-क-पाठः।

इति रुद्रान्तरात्मत्वं विष्णोः प्रतिपाद्यते। तथा तत्रैव ब्रह्मरुद्रसंवादे ब्रह्मा रुद्रं प्रत्याह —

'तवान्तरात्मा मम च ये चान्ये देहिसञ्ज्ञिताः।
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्'॥ इति॥

तथा तत्रैव ब्रह्मरुद्रौ स्तुत्य,

'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ।
तदादर्शितपन्थानौ सृष्टिसंहारकारकौ'॥

इत्युक्तम्।

यच्च द्वितीये खण्डे 'यो वै रुद्रस्स भगवानि'त्यादिदेववचनं तच्च रुद्रवाक्या[1]नुरोधित्वेन तदैकार्थ्यावगमात्, रुद्रवाक्यस्य चोक्तरीत्या तदन्तर्यामिपरत्वनिर्णयात्, अनन्यपरानेकश्रुत्यन्तरविरोधाच्च न रुद्रस्य सर्वैश्वर्यपरमित्यवसीयते।

यच्च तृतीयचतुर्थखण्डयोः रुद्रनामनिर्देश तन्निर्वचनमुखेन तदैश्वर्यपरत्वमुक्तम्, तदपि तयोः खण्डयोः 'स ओङ्कारो य ओङ्कारस्स प्रणवो यः प्रणवः' इत्यारभ्य ओङ्कारादिमहादेवान्तप्रणवनामनिर्देशनिर्वचनपरतया प्रसिद्धरुद्रपरत्वप्रसङ्गाभावादयुक्तम्। रुद्रादिशब्दानां प्रणववाच्यपरमात्मपरत्वेऽप्युक्तरीत्या भगवत एव परमात्मत्वानिर्णयात्, अस्मिन्वाक्ये भगवच्छब्दसामानाधिकरण्याच्च भगवत्परत्वमेव न्याय्यम्।

यच्च पञ्चमे खण्डे रुद्रोपासनस्य मोक्षोपायतया विधानम्, तदप्युक्तेन न्यायेन तदन्तर्यामिभगवदुपासनपरमित्यध्यवसीयते। तथा छान्दोग्ये मधुविद्यायां 'असौ वा आदित्यो देवमध्वि'त्यारभ्य वस्वादिदेवताभोग्यादित्योपासनं मोक्षोपायतया विधीयमानं तदन्तर्यामिपरमात्मोपासनपरमिति 'मध्वादिष्वसम्भवादि' त्यधिकरणे निर्णीतम्।

यश्च तत्र तदङ्गतया भस्मसंस्पर्शविधिः; स च न तस्य सर्वोपासनशेषतामवगमयति। यथा सौत्रामणिशेषतया विहितस्य सुराग्रहस्य न सर्वक्रतुशेषत्वप्रसङ्गः।

ननु 'अणोरणीयानि' त्यनुवाके 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानꣲस नो देवश्शुभया स्मृत्या संयुनक्तु' इति रुद्रस्य हिरण्यगर्भोत्पत्तेः प्रागवस्थानश्रवणेन सर्वकारणत्वं प्रतीयते; नैवम्। न ह्यत्र हिरण्यगर्भोत्पत्तेः पूर्वभावित्वं रुद्रस्य श्रूयते।

1. अनुवादत्वेन—क-पाठः।

किन्तु हिरण्यगर्भजन्मदर्शित्वम्। नच तावता रुद्रस्य ततः पूर्वभावित्वसिद्धिः। 'विश्वाधिको रुद्रो महर्षि' रिति योगप्रभावेन कालत्रयवर्तिसर्ववस्तुसाक्षात्कारित्वेन विश्वेभ्यो योगिभ्योऽधिकतयाधिगतस्य पश्चाद्भाविनोऽपि अतीतहिरण्यगर्भजन्मदर्शित्वसम्भवात्। हिरण्यगर्भोत्पत्तेः पश्चाद्भावित्वञ्च रुद्रजन्मनो महोपनिषदादिषु प्रसिद्धम्। 'स नो देवश्शुभया स्मृत्या संयुनक्तु' इति भगवदुपासनोपयोगितया रुद्रानुग्रहस्य मुमुक्षोस्तदपेक्षत्ववचनम्। तथाच महाभारते उमामहेश्वरसंवादे देवीं प्रति रुद्रवचनं 'उपास्योऽहं सदा विप्रा उपायोऽस्मि हरेः स्मृता'विति। अत्र 'शुभया स्मृत्ये'ति भगवत्स्मृत्या मां संयोजयत्वित्युच्यते। अथवा 'यो देवानां प्रथम'मिति यच्छब्देन हिरण्यगर्भकारणतया श्रुत्यन्तरप्रसिद्धानुवादान्नारायणस्यैव तथा प्रसिद्धेश्च, अत्र रुद्रशब्दश्च आकाशप्राणादिशब्दवदवयवशक्त्या अपर्यवसानवृत्त्या वा नारायणमेवाभिधत्त इत्यवसीयते।

श्रीरुद्रश्च न रुद्रस्य सर्वैश्वर्यप्रतिपादनपरः। अत्र जगत्कारणत्वमोक्षप्रदत्वादिसर्वेश्वरासाधारणधर्मप्रतिपादनादर्शनात्। अग्निचयने चार्थान्तरपरतया तद्विनियोगात्। पूर्वोक्तानन्यपरानेकश्रुत्यन्तरविरोधाच्च। अत एव [1]त्वरितरुद्रपञ्चब्रह्ममन्त्राश्च न रुद्रवैभवपराः। 'सर्वो वै रुद्र' इत्यादिनिर्देशस्तु 'ब्राह्मणो वै सर्वा देवताः' 'आपो वा इदं सर्व'मित्यादिवद्द्रष्टव्यः। 'ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः' — वेदप्रवर्तकस्तन्मुखेन ब्राह्मणवर्गनिर्वाहकश्च ब्रह्मा ज्ञानोपयोगी शिवो मे सदास्त्वित्यन्वयः। उक्तेनैव न्यायेन 'एक एव रुद्रो न द्वितीयाय तस्थे' इत्याद्यपि व्याख्येयम्।

ननु 'अथ यो ह खलु वा' इत्यादिमैत्रायणीयश्रुत्या त्रिमूर्तीनामंशत्वावगमात् अंशी परमात्मा तदतिरिक्त इति प्रतीयते। नैवम्, उक्तरीत्या विष्णोरेव परमात्मत्वनिर्णयात्, तद्विषयोऽयमंशशब्दस्तदवतारविग्रहमात्रपरः; तस्यांशिन एव स्वांशभूतब्रह्मादि सजातीयावतारात् औपचारिको वा।

एतेन 'ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः' इत्याद्यपि व्याख्यातम्। नच 'स ब्रह्मा स शिव' इत्याद्यभेदोपदेशात् ब्रह्मादीनां नारायणेन स्वरूपैक्यमाशङ्कनीयम् स्रष्टृत्वसृज्यत्वार्च्यत्वार्चकत्वादिभेदव्यपदेशात्। अभेदव्यपदेशस्तु तत्तदन्तरात्मत्वनिबन्धन इति प्रागेवोक्तम्। श्रुत्यन्तराण्येवमुक्तरीत्या नेतव्यानि। अतस्सर्वेषु वेदेषु वेदान्तेषु च सर्वस्मात्परत्वेन प्रतिपादितं परं ब्रह्म नारायण एव, न ब्रह्मरुद्रादिरिति सिद्धम्।

---

1. बह्वृच इति स्यात्?

तदेवं प्रत्यक्षश्रुतिभिर्नारायणस्यैव परत्वावगमात्, पौरुषेयाणाञ्च वचसां तदनुरोधेनैव प्रामाण्यात्तदनुरोधीन्येव पुराणादीनि श्रुत्युपबृंहणतयोपादेयानि, नेतराणि ।

किञ्च नारायणपराणां पुराणानां सत्त्वमूलतया प्रामाण्यं, इतरेषां रजस्तमोमूलतया चाप्रामाण्यं वेदार्थसंग्रहे पुरुषनिर्णये च सुव्यक्तमुक्तम् । तस्मान्नारायण एव मुमुक्षुभिर्जिज्ञास्यं परं ब्रह्मेति स्थितम् ।

[1] देवराजार्यपुत्रेण कृतोऽयं तत्त्वनिर्णयः ।
अभंगुरेण यशसा मनसा हर्षशालिना ॥

[2] इति श्रीलक्ष्मणार्यभागिनेयपौत्रेण वेदान्तविद्याविनोदविदग्धेन वत्सकुलतिलकेन वरदार्यमिश्रेण कृतः परतत्त्वनिर्णयः समाप्तः ॥

हरिः ओम् ॥

श्रीनिवासमहागुरवे नमः । हरिः ओम् । श्रीमते रामानुजाय नमः ।

ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ।
पुनातु सर्वदा युष्मान् पुरुषश्च रमापतिः ॥

श्रीवीरराघवगुरवे नमः ॥ श्रीमन्नारायणमहागुरवे नमः ॥

---

1. अयं श्लोकः 'ख' मातृकायामेवास्ति ।

2. इति श्रीवत्सकुलतिलकवरदराजसूरिकृतिषु तत्त्वनिर्णयः समाप्तः ।
हरिः ओम् । शुभमस्तु ।

श्रीः

श्री पराशरभट्टैरनुगृहीता

*अष्टश्लोकी

(श्री श्रीनिवासाचार्यविरचितव्याख्या समलंकृता)

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रीपराशरभट्टार्यैरष्टश्लोक्या रहस्य त्रयार्थो विविच्यते, तस्यास्संग्रहेणार्थः प्रकाश्यते ।

अकारार्थो विष्णुरित्यादिना तत्र प्रथमश्लोकेन श्रीमदष्टाक्षरमन्त्रस्य प्रणवार्थः प्रकाश्यते —

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ-
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्यार्हं नियमयति संबन्धमनयो-
स्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ॥ १ ॥

अस्यार्थः —प्रणवश्चाकारोकारमकारात्मकः । तद्वर्णत्रयं प्रत्येकं पदम् । अकारार्थो विष्णुरिति— 'अक्षराणामकारोस्मि' 'अकारो विष्णुवाचकः' इत्यादिप्रमाणान्यनुसंधेयानि । जगदुदयरक्षाप्रलयकृत्= जगदुदयकृत् जगत्कारणभूतो नारायणः । प्रलयकृत्=प्रलयकर्ता । 'यतो वा इमानी'त्यादिप्रमाणात् । अकारस्यापि सर्वशब्दकारणत्वं सर्व......लयस्थानत्वञ्च । 'अकारो वै सर्वा वाक्' 'तस्य प्रकृतिलीनस्य' इत्यादिप्रमाणात् । तथा च वाच्यवाचकसंबन्धस्तयोर्या(प्रती)यते । एवं स्वभावार्थः उक्तः । 'अव रक्षणे' इति धातुः । तस्य प्रक्रिया ऊह्या । मकारार्थो जीव इति । अयं मकारः 'मनु अवबोधने' 'मन ज्ञाने' 'मसी परिणामे' इत्यस्माद्धातोर्निष्पन्नः तथा च ज्ञानस्वरूपत्वज्ञानगुणकत्व-प्रत्यक्त्वानाश्रयत्वात् देहेन्द्रियादिव्यतिरिक्तजीवसिद्धिरिति भावः । तदुपकरणं वैष्णवमिदमिति-तदिदं सोऽयं जीवः । उपकरणापेक्षया नपुंसकत्वम् । वैष्णवमुपकरणं—विष्णुसंबन्धि स्वं-विष्णोश्शेषमिति यावत् । अनेन लुप्तचतुर्थ्यर्थः प्रकाशितः । उकारस्त्वनयोर्जीवविष्ण्वोश्शेषशेषिभावसंबन्धं लुप्तचतुर्थ्योदितं नियमयति—अन्येभ्यो व्यवच्छिनत्ति । अनन्यार्हमिति निरुपाधिकत्वमुच्यते । अन्यत्रायं संबन्ध

---

*Mss. No. B. 9832/D. 7792. T. M. S. S. M. Library.

औपाधिकः, अत्र तु निरुपाधिकः इति निगमयति। एवं त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् — उपदिदेश ॥ १ ॥

अथ द्वितीयश्लोकेन नमश्शब्दो व्याख्यायते मन्त्रब्रह्मणीति ।

मन्त्रब्रह्मणि मध्यमेन नमसा पुंसस्स्वरूपं गति-
गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः ।
स्वातन्त्र्यं निजरक्षणं समुचिता वृत्तिश्च नान्योचिता
तस्यैवेति हरेर्विविच्य कथितं स्वस्यापि नार्हं ततः ॥ २ ॥

मन्त्रेति। मन्त्रब्रह्मणि - श्रीमदष्टाक्षराख्यमहामन्त्रे । मध्यमेन नमसा—नमश्शब्देन । पुंसो जीवस्य। स्वरूपं-प्रणवोक्तं शेषस्वरूपम् । गतिः - स्वप्रतिपाद्य उपायः । गम्यं - नारायणायेति पदप्रतिपाद्यं कैङ्कर्यरूपं प्राप्यञ्च । शिक्षितम् । कथमिति चेत् :-पुरतः प्रणवेन ईक्षितेन सम्बन्धेन नमसा पुंसः स्वरूपं शिक्षितम् । 'नम' इत्यत्र मकाराध्याहारेण 'अहं मम न' इति वा, किञ्चिदध्याहारेण मम किञ्चिदपि वस्तुभूतं नास्तीति वा—अहंकार-ममकार निवर्तकत्वात् नमसः । पश्चादीक्षितेन नारायणायेति पदसंबन्धेन गम्यं कैङ्कर्यं शोधितम् । उत्तरखण्डनमश्शब्दवत् । कैङ्कर्येऽपि स्वा ... त्व स्वार्थकर्तृत्वस्वाधीनभोक्तृत्वस्वार्थभोक्तृत्वपरत्वान्नमसः । 'भुङ्क्ते स्वभोगमखिलं पतिभोगशेष'मिति न्यायेन फलित्वमपि तस्यैवेति भावः । स्थानतः—स्वस्थानस्थितेन केनापि संबन्धेनेति यावत् । गतिरुपायश्शोधिताः । चरमश्लोके मुख्यवाच्यैकशब्दस्य प्रपत्तावपि प्राधान्यं नास्ति । स्वस्य तत्र प्रधानकर्तृत्वं, न जीवस्येति काचन योजना । तन्न्यायेनात्रापि कैङ्कर्यरूपसाध्यसाधनाकाङ्क्षित्वात् मन्त्ररत्नैकार्थ्याच्च अर्थात् प्रपत्तिरूपनिजभरसमर्पणोपाये स्वस्य प्राधान्यं नास्तीति निषिध्यते । यद्वा, नमसः प्रपत्तिवाचित्वेन काचन योजना। तत्राप्यावृत्त्या उक्तार्थो योज्यः । फलितमाह—स्वातन्त्र्यमिति । आ ... ... स्वातन्त्र्यं निजरक्षणं समुचिता वृत्तिः - कैङ्कर्यरूपं फलमपि । नान्योचिता - परमात्मव्यतिरिक्तजीवोचिता न भवति । ब्रह्मरुद्रादिप्रतिसंबन्धि ... ... त् । स्वातन्त्र्यादीनि तस्य हरेरेवेति विविच्य स्पष्टं कथितम् । ततस्तेनैव नमसा एवं कथनादिति वा । स्वस्यापीति । अन्येष्वन्यतमस्य स्वस्यापि नार्हमिति कथितम् ।

'अहं मद्रक्षणभरो मद्रक्षणफलं तथा । न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥' इत्यस्मिन् श्लोके अयमर्थो द्रष्टव्यः ॥ २ ॥

अथ तृतीयश्लोकेन पदत्रयस्यापि वाक्यार्थो यथाक्रमं संग्रहादुच्यते अकारार्थायेति ।

अकारार्थायैव स्वमहमथ मह्यं न निवहाः
नराणां नित्यानामयनमिति नारायणपदम् ।
यमाहास्मै कालं सकलमथ सर्वत्र सकला-
स्ववस्थास्वाविः स्युर्मम सहजकैङ्कर्यविधयः ॥ ३ ॥

अहं अकारार्थायैव—विष्णव एव । स्वं—शेषभूतोऽस्मि । अनेन प्रणवार्थ उक्तः । अहमिति मकारार्थः । एवेत्युकारार्थः । अकारार्थ इत्यनेन अकारार्थस्त्वमिति लुप्तचतुर्थ्यर्थ उक्तः । अथेति नमःशब्दार्थवर्णनारम्भः । मह्यं नेति नमश्शब्दार्थः । अहमित्यनुवर्तते । अहं मह्यं नेति । मदपेक्षया (मम) शेषत्वं नास्तीत्यर्थः । किञ्चित्पदाध्याहारेण, मम शेषभूतं वस्तु मह्यं किमपि नेति वार्थः । मह्यमिति नमश्शब्दार्थः । नेति नञर्थः । निवहाः नराणां नित्यानामिति नरशब्दव्याख्यानम् । नित्यानां नराणामयनमिति तत्पुरुषसमासप्रदर्शनम् । नराणां निवहा अयनं यस्येति बहुव्रीहिप्रदर्शनम् । निवहा इति नराणां बहुत्वं सूच्यते । इति—उक्तप्रकार-प्रदर्शितेन समासद्वयेन नारायणपदं यं पुरुषमाह, तस्मै नारायणाय । अथ=एतच्छरीरपाता-नन्तरमेव । मम; सकलं कालं—सर्वस्मिन्काले । अत्यन्तसंयोगे द्वितीया, सर्वदेत्यर्थः । सर्वत्र देश इति शेषः । सकलास्ववस्थासु सकलकैङ्कर्यविधयः । विधानं विधिः । स्वरूपप्राप्तकैङ्कर्याणि । सहजेत्युक्त्या संसारा (वस्थायां) कैंकर्याकरणमविद्योपाधिकमित्युक्तं भवति । आविःस्युः—आविर्भवन्तु । प्रार्थनायां लिङ् । कालमित्यारभ्य व्यक्तचतुर्थ्यर्थप्रदर्शनम् ॥ ३ ॥

अथ चतुर्थश्लोकेन श्रीमदष्टाक्षरपदार्थज्ञानानामुपयोगप्रकारं दर्शयति देहेति ।

देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात्तृतीयं
स्वातन्त्र्यान्धो यदि स्यात् प्रथम मितरशेषत्वधीश्चेद् द्वितीयम् ।
आत्मत्राणोन्मुखश्चेन्नम इति च पदं, बान्धवाभासलोलः
शब्दं नारायणाख्यं, विषयचपलधीश्चेच्चतुर्थीं प्रपन्नः ॥ ४ ॥

देहेति—प्रपन्नो देहासक्तात्मबुद्धिः—देहे अहंबुद्धियुक्तो भवति चेत्; तदा तृतीयं पदं, साधु—सम्यक्, विद्यात् । तदर्थं सम्यग्विजानीयादित्यर्थः । तेन देहात्मबुद्धिश्शाम्यतीति भावः । साधु विद्यादित्यस्य सर्वत्रानुषङ्गः । स्वातन्त्र्यं—ममाहमेव शेषीति बुद्धिमत्त्वम् । तेनान्धो

मूढश्चेत्, प्रथमं पदं अकारं सविभक्तिकं विद्यात्। अनेन नारायणस्य शेषित्वे ज्ञापिते स्वशेषित्वबुद्धिश्शाम्यति। इतरशेषत्वधीश्चेत्, द्वितीयं पदमुकारं विद्यात्। आत्मत्राणोन्मुखः— स्वरक्षणे अहमेव कर्तेति बुद्धिविशिष्टश्चेत्, नम इति पदं विद्यात्। चकार उक्तसमुच्चये। बान्धवाभासेषु— औपाधिकबन्धुषु। लोलः—सक्तश्चेत्, नारायणाख्यं पदं साधु विद्यात्। तेन नारायण एव निरुपाधिकबन्धुरिति ज्ञायते। विषये - शब्दादौ। चपलबुद्धिर्भवति चेत्, चतुर्थीं व्यक्तामनुसंदध्यात्। तत्र स्वामिकैंकर्यमेवास्य भोग्यमिति ज्ञायते। एवमष्टाक्षरार्थो व्याख्यातः ॥ ४ ॥

अथ पञ्चमश्लोकेन द्वयार्थो विविच्यते — ईशानामिति।

ईशानां जगतामधीशदयितां नित्यानपायां श्रियं
संश्रित्याश्रयणोचिताखिलगुणस्यांघ्री हरेराश्रये।
इष्टोपायतया श्रिया च सहितायात्मेश्वरायार्थये,
कर्तुं दास्यमशेषमप्रतिहतं नित्यन्त्वहं निर्ममः ॥ ५ ॥

ईशानां जगतामिति श्रीशब्दस्य कर्मणि व्युत्पत्त्यर्थस्सूच्यते। जगतामधीशस्य दयितामिति कर्तरि व्युत्पत्त्यर्थः। अस्येशाना जगतो विष्णुपत्नी' इति श्रुत्यर्थः स्मारितः। श्रियं संश्रित्येति। 'अनन्यशरणश्शरणमहं प्रपद्ये' इति गद्येऽपि श्रीप्रपत्तेः पुरुषकारार्थत्वेन भाष्यकारैरुक्तत्वात्, पुरुषकारत्वेन प्रपद्ये इत्यर्थः। आश्रयणोचिताः अखिलाः वात्सल्यादयो गुणा यस्येति विग्रहः, नारायणपदार्थः। हरेरंघ्री इति चरणशब्दार्थ उक्तः। इष्टोपायतया प्राप्त्युपायतया, शरणशब्दार्थः। अनिष्टनिवृत्त्युपायत्वमपि गृहीतम्। आश्रये—आत्मरक्षाभरनिर्वाहकत्वेनाध्यवस्यामि, प्रपद्य इत्यस्यार्थः। श्रिया च सहितायेत्युत्तरखण्ड श्रीशब्दार्थः। आत्मेश्वराय सर्वशेषिणे, नारायणशब्दार्थः। अर्थये इति विभक्त्यर्थः। अहमिति प्रार्थनासूचितकर्त्रध्याहारः। अशेषं · सर्वविधम्। अप्रतिहतम — अविच्छिन्नम्। अनेन देशविशेषकैंङ्कर्यं विवक्ष्यते। नित्यं— यावदात्मभावि। दास्यं— दासकर्म कैङ्कर्यम्। कर्तुमर्थये इति संबन्धः। निर्ममः— कैङ्कर्ये स्वकर्तृत्वस्वकीयत्वाद्यभिमानरहितः। नमःपदं व्याख्यातम् ॥ ५ ॥

अथ षष्ठश्लोकेन द्वयपदानां तात्पर्यार्थप्रदर्शनमुखेन तद्वैभवं प्रख्याप्यते—नेतृत्वमिति।

नेतृत्वं नित्ययोगं समुचितगुणजातं तनुख्यापनं चो-
पायं कर्तव्यभागं त्वथ मिथुनपरं प्राप्यमेवं प्रसिद्धम्।

स्वामित्वं प्रार्थनां च प्रबलतरविरोधिप्रहाणं दशैतान्
मन्तारं त्रायते चेत्यधिगतनिगमष्षट्पदोऽयं द्विखण्डः ॥ ६ ॥

नेतृत्वं—नियमनम् । पुरुषकारकृत्यम् । श्रीशब्दार्थ उक्तः । नित्ययोगमिति मतुबर्थः । द्वितीयाया मन्तारमित्यनेनान्वयः । समुचितगुणजातं—आश्रयणे अवश्यापेक्षितवात्सल्यादिगुणसमूहः । नारायणशब्दार्थ उक्तः । तनोः-दिव्यमङ्गलविग्रहस्य । ख्यापनं, चरणशब्दार्थः । उपायं शरणशब्दार्थः । कर्तव्यभागं-कर्तव्यं प्रपदनरूपमंशं, क्रियापदार्थः । तत् कीदृशम् ? मिथुनपरं-मिथुनविषयम् । परशब्दोऽत्र विषयवाची । यत्परश्शब्द इतिवत् । अथेत्युत्तरखण्डवर्णनप्रस्तावः । अथशब्द उपरिष्टाद्द्रष्टव्यः । एवं प्रसिद्धं—मिथुनगतत्वेन प्रसिद्धम् । अत्र परशब्दस्य भूतत्वमर्थः । श्रीमच्छब्दार्थ उक्तः । स्वामित्वं-नारायणशब्दार्थः । प्रार्थनाञ्च, कैङ्कर्यस्येति शेषः । चतुर्थ्यर्थः । प्रबलतरस्य स्वरूपरक्षाविषयेभ्यो विरोधिभ्योऽतिशयितस्य विरोधिनः कैंकर्यविषयस्य स्वार्थस्वकीयत्वाद्यभिमानरूपस्य प्रहाणं-धूननम् । शोधनमिति यावत् । एतानित्येवमाकारान्दशार्थान् मन्तारं—अनुसंदधानं, अधिकारिणम् । त्रायते सिद्धोपायवशीकरणेन चेतनं रक्षतीति । मन्तारं त्रायते इत्यनया व्युत्पत्त्या अधिगतनियमः । यद्वा-निगम इति पाठे—निगम्यतेऽनेनेति व्युत्पत्त्या निगमः—प्रसिद्धिः, प्राप्तप्रसिद्धिः । रक्षाविषयप्रसिद्धिरत्रोचिता । यद्वा-निगमो वेदान्तः । वेदान्तप्रसिद्ध इत्यर्थः । अयं—द्वयाख्यो मन्त्रः । षट्पदः, द्विखण्डश्च भवति ॥ ६ ॥

अथ सप्तमश्लोकेन चरमश्लोको व्याख्यायते मत्प्राप्तीति ।

मत्प्राप्त्यर्थतया मयोक्तमखिलं सन्त्यज्य धर्मं पुन-
र्मामेकं मदवाप्तये शरणमित्यार्तोऽवसायं कुरु ।
त्वामेवं व्यवसाययुक्त मखिलज्ञानादिपूर्णो ह्यहं
मत्प्राप्तिप्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथाः ॥ ७ ॥

मत्प्राप्त्यर्थतयेति — हे अर्जुन । मल्लाभहेतुत्वेन मयोक्तं सद्विद्यादिधर्मं परित्यज्य स्थितश्चेत्-तत्राशक्तश्चेदित्यर्थः । पुनरिति वाक्यालंकारे । मामेकं-प्राप्यमेव प्रापकभूतं माम् । मल्लाभार्थं शरणं-प्रधानोपाय इति, आनुकूल्यादिविशिष्टस्वरक्षाभरसमर्पणरूपमध्यवसायं । आर्तः—न मे कल्पकोटिसहस्रेणापि साधनमस्तीति रीत्या यावत्कालतत्त्वमुपायान्तरानधिकारादकिञ्चनस्सन्, कुरु । ज्ञानशक्त्यादिफलप्रदानोपयुक्तनिखिलगुणपूर्णोऽहम् । हीति प्रमाणसिद्धौ । एवमित्यादि—'न्यस्याम्य-

किञ्चनः श्रीमन्' 'स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम्' इति श्लोकद्वयेनोक्तविश्वासयुक्तं त्वां, मल्लाभविरोधिभिः पापैर्मुक्तं करवाणि, शुचं मा कृथाः । न शोकं कृथा इति समीचीनपाठश्चेत् ऋषिकल्पभट्टार्यैरुक्तत्वात्, बहुलं छन्दसि न माङ्योगेऽपीति साधुः व्याख्यानव्याख्येयभावस्सूच्यः ॥

अथाष्टमश्लोकेन चरमश्लोकार्थस्य स्वानुसन्धानप्रकारत्वं दर्शयति—निश्चित्येति ।

* निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः ।
एतद्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथेः ॥ ८ ॥

हे हरे! मयि त्वच्छेषभूते । सदा-इहामुत्र च । त्वदधीनतां-त्वदेकपरतन्त्रस्थितिप्रवृत्तिकतां । निश्चित्य । त्वदुपदेशाच्छास्त्राच्चेति भावः । कर्माद्युपायान्—त्वत्प्राप्तौ साक्षात्परंपरया वा साधनत्वेन त्वदुपदिष्टान् कर्मज्ञानभक्तिरूपहेतून् । कर्तुमनलमसमर्थं, अज्ञत्वादशक्तत्वाच्चेति भावः । शेषः । अतस्त्यक्तुमप्यनलमसमर्थम् । 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' इति नीत्या ।

अपि च, प्रपत्तुं प्रपदनं कर्तुं, उक्तप्रकारेण आत्मरक्षाभरसमर्पणेऽपि अनलमसमर्थम् । प्रपत्तिस्वरूपस्य मया ज्ञातुमशक्यत्वात् । सीदामि—उक्तप्रकारेण कस्याप्युपायस्य परिग्रहाभावेन आगामिनरकदुःखज्ञानादिति । दुःखाकुलः – स .धर्मराहित्येन शोचनमेवाकिञ्चन्यरूपोऽधिकारः । एतज्ज्ञानमुपेयुषः, 'स्वामी स्वशेषं स्ववश 'मि .युक्तश्लोकप्रकारोक्तं ज्ञानं विश्वासं प्रापितस्य ममेति भावः । पुनरिति वाक्यालंकारे । सर्वापराधानां मत्प्राप्तिप्रतिबन्धकानां वासनामोचनं कर्तासि—करिष्यसीत्यनेन प्रकारेण । सारथेः—सौलभ्यादिगुणविशिष्टस्येति भावः । ते—अधिकारानुगुणज्ञानोपदेष्टुः । चरमं वाक्यं—चरमश्लोकम् । त्वदुक्तमर्थविशेषमिति भावः । स्मरन्—उक्तप्रकारेणानुसंदधत् । दृढोऽस्मि । एतच्छ्लोकस्थपदानां व्याख्यानव्याख्येयभावस्समर्थैरूह्यः ॥ ८ ॥

इत्येवमष्टश्लोक्यर्थसंग्रहेण प्रकाशितः ।
कौशिकश्रीनिवासेन वेदान्ताचार्यसेविना ॥

---

* अयं अष्टमः श्लोकः अस्यां मातृकायां नास्ति तस्य व्याख्यानं परमस्ति । अतोऽस्माभिः श्लोको विलिखितः । (सं)

वृत्या देशिकवीक्षणेन कृतया निर्बाधमुज्जृम्भिता
लक्ष्मीकान्ततमालसंश्रयवशा द्राभोगमाबिभ्रती ।
भक्त्या कन्दलितप्रपत्तिकलिकाद्वारेण संविल्लता
स्वान्तोद्यानसमुद्भवा रसघनं सूते गरीयः फलम् ॥

इत्यष्टश्लोकी व्याख्यानं संपूर्णम् ॥

हरिः ॐ । शुभमस्तु । श्रियै नमः ॥

— SARASVATI MAHAL LIBRARY SOCIETY PRESS. —
THANJAVUR.